CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवं । वंदे काशीं गुहां
गङ्गां भवानीं मणिकर्णिकाम् ॥१॥ गङ्गे सोरेद्व रेदेवि
उन्निमाक्तिप्रदायिनि नुवेंद्र दर्शनादेव विमुक्तिः स्नानात्मवा
डुभा ॥२॥ ॐ नमः शिवायै नारायिण्यै दशहरायै गंगायै
स्वाहा ॥ इति गङ्गामंत्रः ॥ अनेन स्नानजपादि कर्तव्यम् ॥

वेदोक्त शिव पद्धतिः

ज्येष्ठमासे सिते पक्षे दशम्यां बुधहस्तयोः । गरानंदे व्यतीपाते
कन्याचंद्रे वृषे रवौ ॥ दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्य
ते ॥ ॐ अस्य श्रीगङ्गामंत्रस्य वेदव्यास ऋषिः पंक्तिश्छंदः श्रीगंगा
भगवती देवता गङ्गाप्रीत्यर्थे जपे विनियोगः ॥ ॐ नमः अङ्गुष्ठाभ्यां
नमः ॥ शिवायै तर्जनीभ्यां स्वाहा २ नारायण्यै मध्यमाभ्यां वषट् ३
दशहरायै अनामिकाभ्यां हुं ४ गङ्गायै कनिष्ठिकाभ्यां वषट् ५
स्वाहा करतलकरपृष्ठाभ्यां फट् ६ एवं हृदयादि न्यासः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ श्रीगणेशाय नमः ॥ अथ वेदोक्तशिवार्च्चनपद्धतिः ॥ तत्रप्र
थममात्मविन्यासः ॥ ॐ या ते रुद्र शिवा तनूरघोरापाप
काशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशी
हि ॥ इति शिखायां ॥ असंख्याता सहस्राणि ये रुद्रा अधि भू
म्याम् । तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ शि
रसि ॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा ऽअधि ॥ तेषाꣳ
सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ललाटे ॥ वयꣳ सो
म व्रते तव मनस्तनूषु विभ्रतः । प्रजावन्तः सचेमहि ॥ भ्रु
वोर्मध्ये ॥ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्वा
रुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ नेत्रयोः ॥
अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः
सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो व

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वे॰ ह्वैडपतिर्वर्च्चः स्वाहा ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा
१ तृतीयनेत्रे नमः स्रुत्याय च पथ्याय च नमः काट्याय
शि॰ च नीप्याय च नमः कुल्याय च सरस्याय च नमो नाद्
याय च वैशन्ताय च कर्णयोः मा नस्तोके तनये मा न
ऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः मा नो वीरा
न्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे
नासिकयोः ऽअवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे नि
शीर्य्य शल्यानां मुखा शिवो नः सुमना भव मुखे न
मो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गि
णऽइषुधिमते तस्कराणां पतये नमो नमः सृकायि
भ्यो जिघांसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो
नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ग्रीवायाम्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः तेषाꣳ
सहस्रयोजनेवधन्वानितन्मसि कण्ठदेशे नमस्तऽ
आयुधायानाततायधृष्णवे उभाभ्यामुतते नमोबाहु
भ्यान्तवधन्वने बाह्वोः येतीर्थानिप्रचरन्तिसृकाहस्ता
निषङ्गिणः तेषाꣳ सहस्रयोजनेवधन्वानितन्मसि
हस्तयोः नमोज्येष्ठायचकनिष्ठायचनमः पूर्वजायचा
परजायचनमोमध्यमायचापगल्भायचनमोजघ
न्यायचबुध्न्यायच अङ्गुलीषु नमः पर्णायचपर्णशदा
यचनमऽउद्गुरमाणायचाभिघ्नतेचनमऽआखिदतेच
प्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवः
किरिकेभ्योदेवानाꣳ हृदयेभ्योनमोविचिन्वत्केभ्योन
मोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ हृदये ॥ नमो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमो

वे: गणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपति
२ भ्यश्चवोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोवि
ति: रूपेभ्योविश्वरूपेभ्यश्चवोनमः ॥ पृष्ट ॥ विकिरिद्रविलो
हितनमस्तेऽस्तुभगवःयास्तेसहस्रँहेतयोऽन्यम
स्मन्निवपन्तुताः ॥ उद्दे ॥ नमःशम्भवायचमयोभ
वायचनमःशङ्करायचमयस्करायचनमःशिवायच
शिवतरायच ॥ इतिगणकदो ॥ द्रापेऽअन्धसस्पतेदरि
द्रनीललोहितआसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मा
रोङ्मोचनःकिञ्चनाममत् ॥ वामकदो ॥ हिरण्यगर्भः
समवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत्सदाधारपृ
थिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ नाभो
मीढुष्टमशिवतमशिवोनःसुमनाभवपरमेवृक्षआ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युधन्निधायकृत्तिँवसानऽआचरपिनाकम्बिभ्रदागहि॥
कक्षम्॥ शिवानामासिस्वधितिस्तेपितानमस्तेऽअस्तु
मामाहिꣳसीः॥ निवर्त्तयाम्यायुषेन्नाद्यायप्रजननाय
रायस्पोषायसुप्रजास्त्वायसुवीर्याय॥ लिंग॥ इमारु
द्रायतवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः॥ यथा
शमसद्विपदेचतुष्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मिन्न
नातुरम्॥ गृह्य॥ इषेत्वोर्ज्जेत्वावायवस्थदेवोवःसवि
ताप्प्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्प्यायध्वमघ्न्या
ऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेन
ऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यात
बह्वीर्यजमानस्यपशून्पाहि॥ रुद्रगणाः॥ मानोम
हान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वे. नमः ॥ मा नो वधीः पितरं मोत मातरं मा नः प्रियास्त
३ न्वो रुद्र रीरिषः ॥ ऊर्वोः ॥ एष ते रुद्र भागः सह स्वस्रा
सि. म्बिकया तं जुषस्व स्वाहैष ते रुद्र भाग आखुस्ते पशुः
जानुनोः ॥ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय
चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघ
न्याय च बुध्न्याय च ॥ जंघयोः ॥ नमो ह्रस्वाय च वाम
नाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृ
धे च नमोऽग्र्याय च प्रथमाय च ॥ गुल्फयोः ॥ ये पथां पथि
रक्षय ऐलबृदा आयुर्युधः ॥ तेषां सहस्रयो
पाद पे जनेऽव धन्वानि तन्मसि ॥ अध्यवोचदधिवक्ता प्रथमो
दैव्यो भिषक् ॥ अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधा
न्योऽधराचीः परासुव ॥ कवचम् ॥ नमो बिल्मिने च कव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ल्मिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसे॥
नाय च नमो दुन्दुभ्याय चाहनन्याय च ॥ऽस्त्रवम्॥ विज्यन्ध
नुः कपर्द्दिनो विशल्यो बाणवाँ उत ऽनेशन्नस्य याऽइष
वऽआभुरस्य निषङ्गधिः ॥ धनुः ॥ यत्र बाणाः सम्पतन्ति कु
मारा विशिखाइव ॥ तन्न इन्द्रो बृहस्पतिरदितिः श
र्म यच्छतु विश्वाहा शर्म यच्छतु ॥ बाणाः ॥ विकिरिद्र
विलोहित नमस्ते अस्तु भगवः यास्ते सहस्रꣳ हेतयो
ऽन्यमस्मन्निवपन्तु ताः ॥ खड्गः ॥ यऽएतावन्तश्च भूयां
ꣳसश्च दिशो रुद्रा वितस्थिरे ॥ तेषाꣳ सहस्रयोजनेऽव ध
न्वानि तन्मसि ॥ हृद्बन्धनम् ॥ एवं न्यासविधिं कृत्वा
शिवोऽहमिति भावयेत् ॥ एवं शिवलिंगेपि न्यासविधिं
कुर्यात् ॥ शिवार्चनम् ॥ मा नो महान्तमुत मा नोऽर्भ

न्तः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वे॰ कम्मानऽउक्षन्तमुतमानऽउक्षितम्॥मानोवधीःपि
६ तरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः॥आ
लि॰ वाहनम्॥यातेरुद्रशिवातनूरघोराऽपापकाशिनी॥
तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि॥आ
सनं॥यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे।शिवाङ्गि
रित्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत्॥पाद्यम्॥शि
वेनवचसात्वागिरिशाच्छावदामसि॥यथानःसर्व
मिज्जगदयक्ष्मꣳसुमनाऽअसत्॥अर्घ्यम्॥अध्यवो
चदधिवक्ताप्रथमोदैव्योभिषक्॥अहीꣳश्चसर्वाञ्जु
म्भयन्त्सर्वाश्चयातुधान्योधराचीःपरासुव॥आच
मनं॥असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्गलः॥
अ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हेडऽईमहे॥ स्नानम्॥ अथ पंचामृतस्नानम्॥ आप्याय
स्वेति मंत्रस्य गौतम ऋषिः सोमो देवता गायत्री छंदः क्षी
रस्नाने विनियोगः॥ ॐ आप्यायस्व समेतु ते विश्वतः सो
म वृष्ण्यम् भवा वाजस्य सङ्गथे॥ पयः पृथिव्यां पयऽओ
षधीषु पयो दिव्यन्तरिक्षे पयो धाः पयस्वतीः प्रदिशः स
न्तु मह्यम्॥ इति पयःस्नानम्॥ ग्नसोमपत्नीभ्योऽग्निरण
ऽडानवभक्षसमङ्गलः पचेन ॐ कद्राऽग्निभितो दिद्रुप्सि
नःसहस्रपोवैपाथ्रूहेडऽईमहे॥ देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ अथ दधिक
स्नानम्॥ दधिक्रावाऽइत्यस्य दधिक्रावा ऋषिः सु
रभिर्दैवतानुष्टुप्छंदो दधिस्नाने विनियोगः॥ दधि
क्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

वे. मुखाकरत्प्रणऽआयूंषि तारिषत् ॥ दधिस्नानम्
५ देवस्यत्वेति शुद्धोदकस्नाने ॥ शुक्रमसीत्यस्यप्रज
शि. प्रजापतिर्ऋषिराज्यं देवतानुष्टुप्छंद आज्यस्नाने
शु विनियोगः ॥ ॐ शुक्रमसि [illegible] ज्योतिरसि तेजो
सि ॥ घृतवती भुवनानामभिश्रिया उर्वी पृथ्वी मधुदुघे
सुपेशसा ॥ द्यावापृथिवी वरुणस्य धर्मणा विष्क
भिते अजरे भूरिरेतसा ॥ घृतं घृतपावानः पिबत व
सां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥
दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः
स्वाहा ॥ घृतस्नानम् ॥ शुद्धोदकस्नानम् ॥ ॐ मधु
वाताऽ इति मंत्रस्य गोतम ऋषिर्मधु देवता गाय
त्री छंदो मधुस्नाने विनियोगः ॥ ॐ मधुवाताऽऋत

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यतेमधुक्षरंतिसिन्धवःमाध्वीर्नःसन्त्वोषधीःमधुनक्त
मुतोषसोमधुमत्पार्थिवꣳरजःमधुद्यौरस्तुनःपिता॥
मधुमान्नोवनस्पतिर्मधुमाँ२अस्तुसूर्य्यःमाध्वीर्गावो
भवन्तुनः॥मधुस्नानम्॥ शर्करा॥ ॐस्वादुःपवस्वेति
मंत्रस्यवेनऋषिःसोमात्मिकाशर्करादेवताजगतीछं
दः शर्करास्नानेविनियोगः॥ॐस्वादुःपवस्वदिव्याय
जन्मनेस्वादुरिन्द्रायसुहवीतुनाम्ने॥स्वादुर्मित्राय
वरुणायवायवेबृहस्पतयेमधुमाँऽअदाभ्यः॥अपा
ꣳरसमुद्वयसꣳसूर्येसन्तꣳसमाहितम्॥अपाꣳर
सस्ययोरसस्तंवोगृह्णाम्युत्तमम्॥शर्करास्नानम्॥
शुद्धस्नानम्॥ॐअध्यवोचदाधिवक्ताप्रथमोदै
व्योभिषक्॥अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वे॰ धन्वो धाराची: परासुव ॥ पुनराचमनीयम् ॥ असौ यो ऽव
रु॰ सर्पति नीलग्रीवो विलोहित: ॥ उतैनं गोपा ऽअदृश्र
सि॰ न्नदृश्रन्नुदहार्य: स दृष्टो मृडयाति न: ॥ वस्त्रम् ॥
ॐ परिधास्यै यशो धास्यै दीर्घायुत्वाज रदष्टिर्यथा
सत् ॥ शतञ्जीवाभिशरद: पुरूचीरायस्पोषमभि
संव्ययिष्ये ॥ वस्त्राणकाटि वधनम् ॥ ॐ नमोऽस्तु नी
लग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये ऽअस्य स
त्वानो हन्तेभ्योऽकरन्नम: ॥ उपवीतम् ॥ प्रमुञ्च धन्व
नस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्च ते हस्त ऽइषव: प
रा ता भगवो वप ॥ ॐ गंधो हे वास्य गंधेनजनं त्वा
स्य गंधेनजनन्न भवति गंधेनैवैनमेनन्त्समर्द्धयति
गंध: ॥ अक्षतान् नमीमदन्त ह्यव प्रिया ऽअधूषत ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्नोषतस्वभोनवेविश्वानविश्व्यामतीयोजातिंवंद्रोह
री॥अज्ञाता॥ विज्यन्धनुः कपर्द्दिनो विशल्यो बाणवाँ॥
२ऽउत॥ अनेशन्नस्य या ऽइषव ऽआभुरस्य निषंगधिः॥
याः फलिन्यो या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः॥
बृहस्पतिप्रसूतास्तानो मुञ्चन्त्व ँ हसः॥ पुष्पाणि॥
अमृतोद्भवं वृन्दं शंकरस्य सदाप्रियम्॥ तन्ते शम्भो प्रय
च्छामि बिल्वपत्रं सुरेश्वर॥ बिल्वपत्राणि॥ या ते हेति
र्मीढुष्टम हस्ते बभूव ते धनुः॥ तयास्मान्विश्वतस्त्व
मयक्ष्मया परि भुज॥ ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं यो
स्मान्धूर्वति तं धूर्व यं वयं धूर्वामः देवानामसि व
ह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्
॥ धूपः॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु वि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वै. ७ शि.

ष्वतः॥अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम्॥
दीपम्॥अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे॥नि
शीर्य्यशल्यानाम्मुखाशिवोनःसुमनाभव॥अन्नप
तेन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥प्रप्रदातारन्ता
रिषऽऊर्जन्नोधेहिद्विपदेचतुष्पदे॥नैवेद्यम्॥न
मस्तऽआयुधायानाततायधृष्णवेउभाभ्यामुततेन
मोबाहुभ्यान्तवधन्वने॥मुखवासः॥नमःपर्णाय
चपर्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेच
नमऽआखिदतेचप्रखिदतेचनमऽइषुकृद्भ्योधनु
ष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳहृ
दयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योन
मऽआनिर्हतेभ्यः॥ताम्बूलम्॥हिरण्यगर्भःसमव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्त्तताग्रेभूतस्यजातःपतिरेकआसीत्॥ सदाधारपृथिवी
न्द्यामुतेमांकस्मैदेवायहविषाविधेम॥ इति॥ अ
थध्यानम्॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकम्॥
गंगाधरंदशभुजंसर्वाभरणभूषितम् १ नीलग्रीवंश
शाङ्काङ्कंनागयज्ञोपवीतिनं॥ व्याघ्रचर्मोत्तरीयंच
वरेण्यमभयप्रदम् २ कमण्डल्वक्षसूत्राभ्यामन्वितंशू
लपाणिनम्॥ ज्वलन्तंपिंगलजटाशिखमुद्योतकारि
णम् ३ अमृतेनाप्लुतंहृष्टमुमादेहार्द्धधारिणम्॥
दिव्यसिंहासनासीनंदिव्यभोगसमन्वितम् ४ दिग्देव
तासमायुक्तंसुरासुरनमस्कृतम्॥ नित्यंचशाश्वतंशु
द्धंध्रुवमक्षरमव्ययम् ५ सर्वव्यापिनमीशानंरुद्रंवैवि
श्वरूपिणम्॥ एवंध्यात्वाद्विजःसम्यक्ततोयजनमा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रमेन॥६॥ नद्यस्याप्युक्ष्योदकेनतर्प्पयेत्॥ ओंभवंदेवंत
र्प्पयामि॥ ओंशर्वंदेवंतर्प्पयामि॥ ओंईशानंदेवंत॰॥ ओं
पशुपतिंदेवंत॰॥ ओंरुद्रंदेवंत॰॥ ओंउग्रंदेवंत॰॥ ओंभी
मंदेवंत॰॥ ओंमहांतंदेवंत॰॥ ओंदेवदेवंत॰॥ ओंज्येष्ठायन
मः पुनराचमनीयम्॥ ओंश्रेष्ठायनमः मधुपर्कः॥ ओंम
धुपर्कंगृहाणेश्वरसर्वदामधुपर्कंप॥ मधुपर्कप्रदाने
नप्रीतोभवमहेश्वर॥ ओंकालायनमः गंधः॥ ओंकाल
विकरणायनमः पुष्पाणि॥ ओंसर्वभूतदमनायनमः
धूपः॥ ओंमनोन्मनायनमः दीपः॥ ओंभवोद्भवायनम
कालनैवेद्यम्॥ कालनैवेद्यांतेजलम्॥ अर्घ्याद्येपु
ष्पांजलयः॥ ओंभवायदेवायनमः॥ ओंशर्वायदेवाय
नमः॥ ओंईशानायदेवायनमः॥ ओंपशुपतयेदेवाय

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमः॥ ॐरुद्रायदेवायनमः॥ ॐउग्रायदेवायनमः॥ ॐ
भीमायदेवायनमः॥ ॐमहतेदेवायनमः॥ ८ ॐभवस्य
देवस्यपत्न्यैनमः॥ ॐशर्वस्यदेवस्यपत्न्यैनमः॥ ॐईशा
नस्यदेवस्यपत्न्यैनमः॥ ॐपशुपतेर्देवस्यपत्न्यैनमः॥
ॐरुद्रस्यदेवस्यपत्न्यैनमः॥ ॐउग्रस्यदेवस्यपत्न्यैनमः॥
ॐभीमस्यदेवस्यपत्न्यैनमः॥ ॐमहतोदेवस्यपत्न्यैनमः
ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यः शर्व
सर्वेभ्योनमस्तेरुद्ररूपेभ्यः॥ ॐतत्पुरुषायविद्महेम
हादेवायधीमहितन्नोरुद्रः प्रचोदयात्॥ ॐशर्वायक्षि
तिमूर्त्तयेनमः॥ ॐभवायजलमूर्त्तयेनमः॥ ॐरुद्रायाग्नि
मूर्त्तयेनमः॥ ॐउग्रायवायुमूर्त्तयेनमः॥ ॐभीमायाकाशमू
र्त्तयेनमः॥ ॐपशुपतयेयजमानमूर्त्तयेनमः॥ ॐमहा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वे० २० शि० पद्ध०

देवायसोममूर्त्तयेनमः ॥ ॐईशानायसूर्य्यमूर्त्तयेनमः ॥ एवं
संपूज्यततःसहस्रघटैःस्नपनम् ॥ अथदक्षिणा ॥ ॐहि
रण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत्
सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधे
म ॥ अथआरात्रिकम् ॥ ॐआरात्रिपार्थिवꣳरजःपितुरप्रा
यिधामभिः ॥ दिवःसदाꣳसिबृहतीवितिष्ठसआत्वे
षंवर्त्ततेतमः ॥ अथपुष्पाञ्जलिः ॥ ॐविश्वतश्चक्षुरु
तविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सं
बाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएए
कः ॥ ॐमानोमहान्तेतिप्रदक्षिणा ॥ ॐभगवन्महादे
वनमस्तेस्तुविसर्जनम् ॥ ॐमानस्तोकेतनयेमानइति
विसर्जनमंत्रः ॥ इतिश्रीवेदोक्तशिवार्च्चनपद्धतिःसमाप्ता

मुतमानोअर्भकंमानउक्षन्तमुतमानउक्षितम् मानोवधीःपितरंमोत
मातरंमानःप्रियास्तन्वोरुद्ररीरिषः ॥ १ ॥

Kashi Maharaj Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ नमः भजगोविंदं भजगोविंदं गोविंदं भजमूढ
मते प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृं
करणे ॥ मं० १ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्त
रुणीरक्तः वृद्धस्तावच्चिंतामग्नः पारे ब्रह्मणि को
पि न लग्नः ॥ मं० २ ॥ अंगं गलितं पलितं मुंडं दशनविहीनं
जातं तुंडं वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशापिं
डं ॥ मं० ३ ॥ दिनमपि रजनी सायं प्रातः शिशिरवसंतः
पुनरायातः कालः क्रीडति गच्छत्यायुः तदपि न मुंच
त्याशावायुः ॥ मं० ४ ॥ अग्रे वह्निः पृष्ठे भानुः रात्रौ चिबुक
समर्पितजानुः करतलभिक्षा तरुतलवासः तदपि न
मुंचत्याशापाशः ॥ मं० ५ ॥ रथ्याकर्पट विरचितकं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१ यापुण्यपापविवर्जितपंथा नाहंनत्वंनायंलोकस्
तदपिकिमर्थंक्रियतेशोकः ॥ मं० ६ ॥ नारीस्तनभरज
घनिवेशं दृष्ट्वामायामोहावेशं एतन्मांसवसादि
विकारं मनसिविचिंतयवारंवारं ॥ मं० ७ ॥ वयसि
गतेकः कामविकारः शुष्केनीरेकः कासारः क्षीणे
वित्तेकः परिवारः तत्त्वेज्ञातेकः संसारः ॥ मं० ८ ॥ य
वद्वित्तोपार्जनसक्तस्तावन्निजपरिवारोरक्तः प
श्चाज्जीवतिजर्जरदेहे वार्त्तांकोपिनपृच्छतिगेहे ॥
मं० ९ ॥ जटिलोमुंडी नलुंचितकेशा काषायांवरवि
वचितवेषा पश्यंतोपिनपश्यतिलोका उदरनिमि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नंबहुकृतवेषः ॥भ०॥१०॥ गेयंगीतानामसहस्रं ध्येयंश्री
पतिरूपमजस्रं नेयंसज्जनसंगमनित्यं देयंदीनजना
यचवित्तं ॥भ०॥११॥ भगवद्गीताकिंचिदधीता गंगाजल
लवकणिकापीता येनाकारिमुरारेरर्चा तस्ययमोपि
करोतिनचर्चा ॥भ०॥१२॥ पुनरपिजननं पुनरपिमरणं पु
नरपिजननीजठरेशयनं इहसंसारेभवदुस्तारेकृप
यापारेपाहिमुरारे ॥भ०॥१३॥ कोहंकस्मात्कुतआया
तः कोमेजननी कोमेतातः इतिपरिभावितसर्वमसार
सर्वंत्यक्त्वास्वप्नविचारं ॥भ०॥१४॥ इतिश्रीमच्छंकरा
चार्य्यविरचितंगोविंदस्तोत्रंसंपूर्णंसमाप्तं ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kashi Maharani Collection, Ramnagar Fort, Varanasi